# Gokarna Kshetra Mahatmyam

# ગોકર્ણક્ષેત્રમાહાત્મ્યમ્

## Document Information

Text title : Gokarna Kshetra Mahatmyam

File name : gokarNakShetramAhAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 23||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 18, 2023

*sanskritdocuments.org*

# ગોકર્ણક્ષેત્રમાહાત્મ્યમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

મમાસ્તિ દેવિ સુભગે ક્ષેત્રં ગોકર્ણસઞ્જ્ઞકમ્ ।
ગોકર્ણેશં સમારાધ્ય વિમુક્તા બહવો જનાઃ ॥ ૧॥

પશ્ચિમે સાગરોપાન્તે તત્ક્ષેત્રં મમ કામદમ્ ।
ભોગમોક્ષપ્રદં દેવિ સર્વપાપવિનાશકમ્ ॥ ૨॥

તત્રૈવ બ્રહ્મવિષ્ણ્વાદ્યા મુનયઃ કાશ્યપાદયઃ ।
પુલસ્ત્યભાર્ગવાદ્યાશ્ચ વિશ્વામિત્રપરાશરાઃ ॥ ૩॥

પૌલસ્ત્યાદ્યાશ્ચ તત્રૈવ રાવણાદ્યા મહૌજસઃ ।
ગન્ધર્વાઃ કિન્નારા યક્ષા નાગા વિદ્યાધરા ગણાઃ ॥ ૪॥

નન્દિભૃઙ્ગિપ્રભૃતયો નારદાદ્યા મુનીશ્વરાઃ ।
દૈત્યનાથાશ્ચ તત્રૈવ તપ્ત્વાઽમિતબલા ભવન્ ॥ ૫॥

અન્યે સુરાસુરાઃ સર્વે મુનયસ્તાપસાસ્તથા ।
ગોકર્ણેશં સમારાધ્ય લેભિરે તપસઃ ફલમ્ ॥ ૬॥

ગોકર્ણેશમહો દૃષ્ટ્વા મહાબલમનુત્તમમ્ ।
તત્રૈવ ભાર્ગવો રામો રેણુકાતનયઃ શિવે ॥ ૭॥

નિઃક્ષત્રિયકૃતં પાપં ત્યક્ત્વા માં શરણં ગતઃ ।
વામદેવોઽપિ સાર્વાત્મ્યં યત્ર પ્રાપ મહાબલે ॥ ૮॥

ગોકર્ણેશં સમારાધ્ય મુનયો ભક્તિતત્પરાઃ ।
જ્ઞાનં વેદાન્તવાક્યોત્થં લેભિરે મુક્તિદાયકમ્ ॥ ૯॥

ગોકર્ણસઞ્જ્ઞકં લિઙ્ગં દર્શનાન્મુક્તિદાયકમ્ ।
સંસારપાશબદ્ધાનાં મોચકં ભવભેષજમ્ ॥ ૧૦॥

શક્રો દુર્વાસસા શપ્તો નિઃશ્રીકશ્ચાભવત્ પુરા ।
ગોકર્ણેશં સમારાધ્ય મહતીં શ્રિયમાપ્તવાન્ ॥ ૧૧॥

ગોકર્ણે સાગરૈઃ પૂજા કૃતા ભક્તિપુરઃસરમ્ ।
અત્ર સન્તિ મહાશૈવાઃ સદા ભસ્માઙ્ગપાણ્ડરાઃ ॥ ૧૨॥

રુદ્રાક્ષમાલાભરણા રુદ્રાવર્તનતત્પરાઃ ।
પઞ્ચાક્ષરપરા નિત્યં મમ લિઙ્ગાર્ચનાદરાઃ ॥ ૧૩॥

ભવભક્તાર્ચનપરા મન્નામજપતત્પરાઃ ।
વેદવેદાન્તતત્ત્વજ્ઞા યતયશ્ચ તથામ્બિકે ॥ ૧૪॥

ગૃહસ્થા યતયશ્ચૈવ વનસ્થાશ્ચ તથા પરે ।
વર્ણિનોઽપિ તથા ગૌરિ પર્ણામ્બુફલભોજનાઃ ॥ ૧૫॥

ગોકર્ણનિલયં શમ્ભુમપર્ણાપતિમીશ્વરમ્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય નિત્યં નૈવેદ્યભોજિનઃ ॥ ૧૬॥

અગસ્ત્યોઽપિ સદા ભક્ત્યા નિત્યં માં સ્તૌતિ શઙ્કરિ ।
રુદ્રસૂક્તૈર્મહાદેવિ બિલ્વપત્રૈઃ સમર્ચ્ય ચ ॥ ૧૭॥

વેદાઃ સાઙ્ગોપનિષદો મૂર્તિમન્તઃ સદામ્બિકે ।
સેવાવસરમાલોક્ય મહાબલમુપાસતે ॥ ૧૮॥

બ્રહ્મા ચતુર્ભિર્વદનૈશ્ચાતુર્હોત્રૈઃ સ્તુવત્તદા ।
ષણ્મુખોઽપિ સદા ભક્ત્યા મામુપાસ્તેઽમ્બિકાસુતઃ ॥ ૧૯॥

ગણેશાઽપિ સદા દેવિ બિલ્વૈરભ્યર્ચયત્સદા ।
શેષઃ પ્રત્યહમાગત્ય પાતાલવિવરાદુમે ॥ ૨૦॥

સ્વફણામણિમાણિક્યૈર્બિલ્વૈઃ સમ્પૂજ્ય માં સદા ।
સહસ્રવદનૈરીશં નામભિશ્ચ સહસ્રકૈઃ ॥ ૨૧॥

કોમલૈર્બિલ્વપત્રૈશ્ચ કમલૈઃ પૂજયત્યુમે ।
દિગ્ગજાશ્ચ સદા ગૌરિ સ્વશુણ્ડાબલયોદ્ધૃતૈઃ ॥ ૨૨॥

પાનીયૈઃ બિલ્વપત્રૈશ્ચ સાબ્જનાલૈસ્તથામ્બિકે ।
પૂજયન્તિ મહાલિઙ્ગે ગોકર્ણેશં મહાબલમ્ ॥ ૨૩॥

વિષ્ણુશ્ચાત્રાતપત્દેવિ દાનવૈશ્ચ પરાજિતઃ ।
પુનરાપ્યાયિતશ્ચાસીત્મત્કટાક્ષેણ શોભને ॥ ૨૪॥

બ્રહ્મણાપિ તપસ્તપ્તં સૃષ્ટિવિજ્ઞાનહેતવે ।
ભૂમ્યન્તરિક્ષગા રુદ્રા યે દિવ્યપ્સુ પ્રતિષ્ઠિતાઃ ॥ ૨૫॥

નિષઙ્ગિણઃ કવચિનઃ ખઙ્ગખેટધનુર્ધરાઃ ।
ઈશાનપ્રમુખાઃ સર્વે મહાબલમુપાસતે ॥ ૨૬॥

અશ્વિનૌ મરુતશ્ચાપિ વસ્વાદિત્યા દિગીશ્વરાઃ ।
તપ્સ્યન્તિ મત્પ્રસાદાર્થં ધનદોઽપિ સદા મુદા ॥ ૨૭॥

મત્પ્રસાદાત્ધનેશત્વં સખિત્વં તસ્ય ચાભવત્ ।
અત્ર ચન્દ્રોઽપિ દેવેશિ તપસ્તપ્ત્વા સુદુષ્કરમ્ ॥ ૨૮॥

ગુરુદારરતાત્પાપાન્મુક્તોઽભૂન્મત્પ્રસાદતઃ ।
ચણ્ડાંશુરપિ દેવેશિ ગોકર્ણેશં સમર્ચયન્ ॥ ૨૯॥

છાયાત્યાગજપાપેન મુક્તોઽભૂદત્ર સુન્દરિ ।
ગોકર્ણેશં સમારાધ્ય મહતીં શ્રિયમાપ્તવાન્ ॥ ૩૦॥

દૈત્યરાજસ્તથા બાણો વિરોચનસુતો બલી ।
પ્રચિત્તિર્વિઘસશ્ચૈવ મુરો જન્મસ્તથાન્ધકઃ ॥ ૩૧॥

વૃત્રશ્ચ નમુચિશ્ચૈવ અસુરૌ મધુકૈટભૌ ।
સુન્દોપસુન્દૌ દેવેશિ શૂરસ્તારક એવ ચ ॥ ૩૨॥

હિરણ્યાક્ષશ્ચ કશિપુઃ પ્રહ્લાદો મન્થરસ્તથા ।
બલો નામાસુરેન્દ્રશ્ચ મહતીં પ્રાપ્નુવન્શ્રિયમ્ ॥ ૩૩॥

શક્રોઽપિ વૃત્રવધ્યાતોઽપ્યહલ્યાસઙ્ગપાતકાત ।
વિમુક્તઃ સર્વદા વિપ્રાઃ ગોકર્ણેશસમર્ચનાત્ ॥ ૩૪॥

એતે સર્વે તપસ્તપ્ત્વા ગોકર્ણેશં સમર્ચ્ય ચ ।
સર્વે પ્રાપતબલાઃ શૂરાઃ શત્રુવિત્રાસકાઃ સદા ॥ ૩૫॥

ગોકર્ણેશં સમારાધ્ય પૂજયા તપસાઽપિ ચ ।
ગન્ધર્વાધ્યા મહાભાગે ચિત્રવર્મા હહાહુહૂઃ ॥ ૩૬॥

તુમ્બુરુશ્ચાપિ કણ્ડુશ્ચ નારદો દેવગાયનઃ ।
ગાન્ધર્વમેદમખિલં પ્રાપ્નુવન્મત્પ્રસાદતઃ ॥ ૩૭॥

નાગનાથા મહાભાગે ગોકર્ણેશાર્ચને રતાઃ ।

ધૃતરાષ્ટ્રઃ શઙ્ખપાલઃ કમ્બલાશ્વતરૌ તથા ॥ ૩૮॥

અનન્તો વાસુકિશ્ચૈવ તક્ષકઃ કુણ્ડરસ્તથા ।
સ્વફણાભિર્મહાલિઙ્ગં છાદ્ય સમ્પૂજ્ય બિલ્વજૈઃ ॥ ૩૯॥

કોમલૈઃ કમલૈરીશં દલૈઃ સમ્પૂજયન્તિ હિ ।
કામધેનુગણાશ્ચાપિ સુરભિર્નન્દિની તથા ॥ ૪૦॥

સ્વોધઃસમ્ભૂતપયસા સફેનેનાભ્યષેચયન્ ।
બિલ્વૈર્મહાબલેશાનં સમ્પૂજ્ય મુદમાપ્નુવન્ ॥ ૪૧॥

ધર્મોઽપિ વૃષરૂપેણ તપસ્તપ્ત્વાત્ર માં શિવે ।
મત્તો લબ્ધવરો દેવિ માં વહત્યેવ પૃષ્ઠતઃ ॥ ૪૨॥

ગોકર્ણેશપ્રસાદેન ચન્દ્રસૂર્યાન્વયોદ્ભવાઃ ।
રાજાનશ્ચ સહસ્રાણિ નિત્યં માં પર્યુપાસતે ॥ ૪૩॥

મનુર્વિકુક્ષિઃ કુક્ષિશ્ચ શશબિન્દુર્ભગીરથઃ ।
રઘુશ્ચૈવાથ માન્ધાતા યુવનાશ્વો ગયસ્તથા ॥ ૪૪॥

રન્તિદેવઃ પૃથુર્વૈન્યો મુચુકુન્દો દૃઢાશ્વકઃ ।
દિલીપઃ સગરો વિંશો નાભાગશ્ચ કરન્ધમઃ ॥ ૪૫॥

આયુષ પુરુશ્ચ ભરતો યયાતિર્નહુષઃ કુરુઃ ।
ખટ્વઙ્ગોઽથ નૃગોઽરિષ્ટસ્તથા સંવરણો નૃપઃ ॥ ૪૬॥

ગોકર્ણેશં સમારાધ્ય પૃથિવ્યાઃ પતયોઽભવન્ ।
દેવિ કિં બહુનોક્તેન ગોકર્ણેશપ્રસાદતઃ ॥ ૪૭॥

સમભ્યર્ચ્ય મહાલિઙ્ગં સ્વં સ્વં સ્થાનં સુરાસુરાઃ ।
લેભિરે પરમેશાનિ મહાબલસમર્ચનાત્ ॥ ૪૮॥

ભુક્તિમુક્તિપ્રદં ક્ષેત્રં સર્વસમ્પત્પ્રદાયકમ્ ।
અત્ર જપ્તોઽથ યઃ કશ્ચિન્મન્ત્રસિદ્ધિં ગમિષ્યતિ ॥ ૪૯॥

પઞ્ચાગ્નિમધ્યનિરતા વાયુભક્ષાસ્તથાઽપરે ।
જટોરુશિરસઃ કેચિદ્દન્તોલૂખલિનઃ પરે ॥ ૫૦॥

ભસ્માભ્યક્તાઃ સદા કેચિદ્ રુદ્રાધ્યાયજપાદરાઃ ।
પઞ્ચાક્ષરપરાઃ કેચિદ્કેચિન્મન્નામજાપકાઃ ॥ ૫૧॥

શિવ શઙ્કર દેવેશ ગોકર્ણેશ મહેશ્વર ।
પ્રસીદ પરમેશેતિ તત્ર શૈવા વદન્તિ મામ્ ॥ ૫૨॥

કેચિલ્લિઙ્ગાર્ચનપરાઃ બિલ્વપત્રાદિભિઃ શિવે ।
સાગ્નયોઽનગ્નયઃ કેચિદ્ યતયો ભક્તિભાવિતાઃ ॥ ૫૩॥

વર્ણિનો વનસંસ્થાશ્ચ બ્રાહ્મણા મામુપાસતે ।
બ્રહ્મણ્યપતિરેવાહં મહાબ્રાહ્મણ ઈશ્વરઃ ॥ ૫૪॥

વસન્તિ શૈવા ગોકર્ણે મન્નૈવેદ્યૈકભોજનાઃ ।
અત્ર શૈવં સમભ્યર્ચ્ય મમ લોકે વસેન્નરઃ ॥ ૫૫॥

અત્ર સર્વેષુ કાલેષુ સાગરસ્નાનકૃન્નરઃ ।
એકં શૈવં ભોજયિત્વા મત્પ્રીત્યર્થમુમે શુભે ॥ ૫૬॥

ભક્ષ્યભોજ્યૈઃ સદન્નૈશ્ચ સ માં ભોજયિતામ્બિકે ।
ગોકર્ણેશં પૂજયિત્વા બિલ્વપત્રાદિસાધનૈઃ ॥ ૫૭॥

કોટિલિઙ્ગાર્ચનફલં પ્રાપ્નોતિ સ વરાનને । ૫૮-૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ગોકર્ણક્ષેત્રમાહાત્મ્યમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૩॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 23..

Notes:
Shiva describes to Devi about Gokarna Shiva Kshetra and the merits of worshipping Him at this place where He is known as Gokarneshwara.
The shlokas are maintained per the source text.

Proofread by Ruma Dewan

*Gokarna Kshetra Mahatmyam*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*